ते न स्वभावतः ॥१६॥ कार्यकारणभावाख्यैः क्वापि न विद्यते ॥ व्योम्नि नभस्य सिद्धस्य किं कथं क्वचिज्जायते ॥१७॥ तच्च जात
मिवाभाति व्योम्नि व्योमैव तत्तथा ॥ तत्रैकद्वित्वकलनाकीदृशी स्यादरूपिणी ॥१८॥ न द्विपादप्राप्ने यासीरा दृष्टैवावतिष्ठ
ते ॥ निर्विकारं यथा स्वप्ने व्योमैवाचलवद्भवेत् ॥१९॥ संकल्पोऽपि च नभाकारं यथोदेत्युदितोदया ॥ न च तो द्विनैत
द्व्योम तथा ब्रह्मजगत्स्थितिः ॥२०॥ काष्ठवन्मौनमास्थाय यद्वतोपि न कार्यधियः ॥ ३ हृद्यो वहरं स्येतेषु यादारूनगादृश ॥
२१॥ यथावारिणि वर्त्तेन तरंगावर्तवृत्तयः ॥ अनन्याः परिवर्ततेतथा ब्रह्मणि सृष्टयः ॥२२॥ यथावा योपरिस्पंदाय
थाव्योमनि शून्यता ॥ अनन्या श्राप्यमूर्ताश्च तथा ब्रह्मणि सृष्टयः ॥२३॥ यथा संकल्पनगरं शून्यमेव पुरं स्थितं ॥ साकारमप्यनाकारं ब्रह्मणी
दं तथा जगत् ॥२४॥ चिरानुभूतमप्यर्थं कार्यपादं जगत्त्रयं ॥ शून्यमेव निराकारं संकल्पनगरं यथा ॥२५॥ यदेव चित्तसंकल्पस्तदेव नगरं यथा ॥ न दृ
ष्टा यं ब्रह्मणश्छंतदेव जगदुच्यते ॥२६॥ चिरं स्थिता नुभूतोपि जगदर्थो न किंचन ॥ विद्यते पुरुषस्येह स्वप्ने स्वमरणं यथा ॥२७॥ स्वप्नेपु सामर्थ्ये
नापि स्वदेहोदयनं यथा ॥ असदेव सदाभासं जगद्दृष्टं परे तथा ॥२८॥ जगत्त्रा चाजगत्ता च परस्यैव मलं वपुः ॥ पराभिधानं च परं न च सत्परमार्थतः ॥२९॥

भावतश्चिद्व्योमानश्चित्तस्त्रास्फूर्त्तिर्व्योम्नि येनो न विद्यन इत्यर्थः ॥१६॥ कारणत्वाबलादेव तस्मान्यामविद्यते ति तु न तास्य मेव निरस्तत्वादित्याह कार्येति ॥ सर्गा
दौ प्रलयता योम्नः ॥१७॥ यच्चजातमिवाभाति भूतभुवनादि न तु व्योम्नि व्योमैव जातमिवाभाति ॥ तत्रैकत्वद्वित्वकलनापि दुर्लभा दूरे कार्यकारणभाव इत्यर्थः ॥१८॥
न हि द्वैस्यैवकारणमस्त्वित्याह ॥ नद्धीति ॥ विवर्ताधिष्ठानमेव विकाराभिन्नकारणमित्यर्थः ॥१९॥ आकारं कल्पयित्वेति शेषः ॥२०॥ अत एव स्वदृष्ट्या मिथ्यापात्रण
वजीवन्मुक्ताः व्यवहरंतद्भवंतीति ॥ न वस्तुत इत्याह ॥ काष्ठवदिति ॥२१॥२२॥२३॥२४॥ अर्थं प्राज्ञो लौकिकं वैदिकं कार्यं समर्थमपि ॥२५॥ तदा संकल्पनगरव्यवहार
कालेतथा ऽपरिदृश्यमानं पुराकारोपि ॥२६॥२७॥ परस्य मन्यजत्वादिपराभिधानस्य पीच्याभिधानगोचरो भवतितत्परमार्थतः सन्न ॥२९॥ ॥ ॥

६९२

हे राम सिद्धलोकभोगादिफलं इहैव मद्दर्शितप्रकारेणैव कल्प्यमात्रमस्तु यदि वाऽन्यथा अन्ये पुनर्निर्विकल्पितप्रकारेणान्यादृशमेवास्तु मैव भोगस्तु तथापि जीवन्मुक्तस्यात्र कः संभ्रमः आदरः फलानुनिविष्टिः आदिफलेऽपि फलमहं पुरुषार्थतां बुद्ध्वा मुंचयतस्त्वं ब्रह्मतत्त्वं बुद्धवानसि। अतस्ते मायामात्ररूपसिद्धलोकवैभवपरिज्ञातश्रमैः कृतं अलं साध्यं नास्तीत्यर्थः ॥३०॥ ॥इति श्रीवासिष्ठतात्पर्यप्रकाशे निर्वाणप्र० उत्तरा० एकादशोत्तरद्विशततमः सर्गः ॥२११॥ ॥ब्रह्मैवाहं भावकलनापरमेष्ठीजगत्त्रये ॥ तत्संकल्प्यमयं तस्माद्ब्रह्मैवेत्यत्र वर्ण्यते ॥ ब्रह्म सृष्टिप्रथमसमये अहंकारात्मा हिरण्यगर्भ इव कल्प्यमानं तद्वदेव च व्यष्टिजीवजगत्कल्प्यनेति सर्वं ब्रह्मविवर्तमात्रमेवेति तद्दर्शनसिद्धं परमार्थदृशेन हिरण्यगर्भजीवजगद्वा किंचिदस्ति ब्रह्मैव केवलं नित्यनिर्मलसच्चिदानंदैकरसं पूर्णमवतिष्ठत इति सर्ववेदांतनिष्कृष्टार्थमं तेव वर्णयितुमुपक्रमते ।

॥इच्छमस्त्वथ यदि वान्यथास्तु वा मैवमस्त्व इव तु कोऽत्र संभ्रमः ॥ मुंच फलानुनिफलेऽपि फलमहं बुद्धवानसि हतं परिश्रमैः ॥३०॥ माहारामायणे निर्वाणप्रकरणे परमार्थोपदेशो नामैकादशोत्तरद्विशततमः सर्गः ॥२११॥ श्रीवसिष्ठ उ० ॥ चिल्लाद्ब्रह्म स्वमेवाहमिति वेत्ति वयस्त्वयं ॥ तदेव परमेष्ठित्वं तस्यादरमिदं जगत् ॥१॥ एवं स्थितेन च ब्रह्म स्थानं च जातं जगत्स्थितं ॥ स्थितं यथास्थितमजं परं ब्रह्मैव पूर्ववत् ॥२॥ संवित्तौ तु जगद्रूपं भासते चैवमेव तत् ॥ स्वगतं च वृत्तिष्वेव दृश्यमानमपि स्तनं ॥३॥ अतः प्रभृति स्वयं भ्रान्तिरभ्युदिता न वा ॥ कुतः केव किल भ्रान्तिर्ब्रह्मैवेदं नामयं ॥४॥ जगद्ब्रह्म जलं ... द्वित्वे कल्पिता त्रिके ॥ को वर्त्तिपयसो द्वित्वे दिलोभावात्को चेकृता ॥५॥ तद्वत् घनमाशांतं चिल्लाच्चेतयद् विदन् ॥ निजशून्यमतं स्वच्छं यो मेवश्चिन्तानेरं ॥६॥ पवने स्पंदनमिव द्रुनाशे नइवोक्ततां ॥ स्वशीत्यमिव ब्रह्मैव दुःसत्तामर्थमिवात्मनः ॥७॥ श्रीराम उ० ॥ एतद्ब्रह्म कदा नाम तन्न चेतति वस्तुने ॥ निराद्यन्तमनाद्यन्तं किमिदानीं प्रचेतति ॥८॥ श्रीवसिष्ठ उ० ॥ एवमेतत्सदैवैतद्ब्रह्म माद्यपि चेतति ॥ न स्यनादेरजस्यास्य कार्यापेक्षा स्वसंविदा ॥९॥ सर्गासर्गेन भोरूपं ब्रह्म सर्वत्र सर्वदा ॥ न कदाचिदिदं नेदं ज्ञातं नेदं च किंचन ॥१०॥ पवनस्पंदनं चं द्रुशो यं शून्यत्वमेवरं ॥ ब्रह्मा हि वेमनन्यो मनो न कदाचन चेतति ॥११॥ सर्वदैवेदृशी संस्थान कदाचिदनीदृशी ॥ जगदस्मादनाद्यंतं ब्रह्मैवनिरामयं ॥१२॥

चिल्लादिति ॥ ब्रह्म स्वं स्वयमेव प्रथमं अहंकारसमष्ट्यात्मानं वेत्ति वेत्ता तादृशवेदनमेवास्य परमेष्ठित्वं हिरण्यगर्भता ॥१॥ न च माथिकेन तावन्मात्रपरार्थेन ब्रह्म ब्रह्मभवतीति हिरण्यगर्भादि किंचिदन्यं नासीदेवेत्याह। एवंस्थितेति ॥ २ ॥ यदि नासीदेव तर्हि संवित्तौ कथं भासते तत्राह ॥ संवित्ताविति एवमेव प्रातिभासिकमेव सत्तया ३ ॥ अतः सर्गकालात् प्रभृति भ्रान्तिरभ्युदिता अथवा सापि नाभ्युदितैव ॥४॥ अस्तु नाम जगदनिर्वचनीयो ब्रह्म सधर्मः तथापि न क्षतिरित्याह। जगदिति ॥५॥ चिल्लासप्रथा स्वाभाव्यात् अहमित्यहंकारसमष्ट्यात्मतां विदन् ॥६॥ ब्रह्मैवात्मनः अर्थ इव सत्तां चेतति ॥७॥ यदि स्वस्वरूपचैतन्यमेवास्मिन्प्रत्येऽर्थ इव चकास्ति तु च्यते तर्हि तत्सदैवास्तीति कुतो नीप्रचेतति किमुच्यते तत्राह राम पृच्छति। एतदिति। एतदहमोदिकं दानचेति वन् यतः सदैव निराद्यन्तं निरवयवं अनाद्यंतं निर्यच तद्विदानीं सर्गादिकालमारभ्य प्रचेततीति किमुच्यत इत्यर्थः ॥८॥ सत्यमयो क्रिकृदृशा सदैवोहमादिस्वतत्त्वं च प्रचेतति। तथा च सर्गानि यरूपं ब्रह्म तद् दृष्टिद्वये प्रामाण्ये पर्यवस्यति। तथापि दृष्टिद्वयेविषयसत्त्वासत्त्वे कृतं जरमस्तीति प्रामाण्ये न तुल्यमित्याशयेनाभ्युपगम्य विरोधं परिहरति एवमेतदित्यादिना। स्वसंविदा विद्यया स्वरूपस्फूर्तौ अविद्यया अहमादिस्फूर्तौ च अन्यापेक्षाय तो नास्तीत्यर्थः ॥९॥ यतः कदाचिदपि अविद्यादृष्टौ नेदं न ज्ञातं विद्यादृष्टौ नेदं किंचन ॥१०॥ मिश्रदृष्टौ तर्हि कीदृशं चेतनति तत्राह पवनेति ॥११॥ सर्वदैवेति विपश्चिदुपाख्याने ... सर्वजीवसंसारोच्छेदकालाप्रसिद्धेरिति भावः ॥१२॥

इमां मिश्रदृष्टिमपि तवाबोधानुरञ्जितपर्यन्तमेव शब्दश्रवणादिव्यवहारसिद्ध्येऽभ्युपैषि चेदभ्युपगच्छ । न परमार्थतइत्याह । केवलमिति । अद्वये ब्रह्मबोधे जातेपि अबुद्धत्वाद बोधमभ्युपेत्य स्वश्लोकेपि पंचमीमुपदेशशब्दश्रवणे वेधिनः । आसन्नचित्तः सन्मिश्रदृष्टिं द्वैताद्वैतासप्रपंचानिष्प्रपंचोरूपत्तां अभ्युपगच्छसि ननु तत्त्वदृष्ट्यैत्यर्थः ॥१२॥ मिश्रदृष्टेर्हि सर्वात्मकं ब्रह्म तत्र सर्वान्तर्गतः कश्चिज्जीवः किंचिच्चेतयेद्वा चेतद्दूष्टौ वनदाप्ल नाचेतनीति तदा नसर्वः सर्वदा सर्वचेतति निर्विशेषब्रह्मात्मनो च कश्चित्किंचिद पि न कदाचन चेतति ॥१४॥ तथा च तद्दृष्ट्या त्रिभुवनाभासमेवसदेव ब्रह्म भाति मुक्तदृष्ट्या नेदं नानास्ति किंचनेति न किंचिद्भातीत्यर्थः ॥१५॥ तत्र ब्रह्मदृष्टेर्बोधितामिव न्युक्तदृष्टिर्वेतया श्रयणीये त्याह । न कदाचनेति ॥१६॥ यावदुपदेशोपदेशप्रवृत्तिमिश्रदृष्टिरभ्यनुज्ञाता मयेत्याह । उपदेश्येति अभ्युपगच्छसि । अभ्युपगच्छतादुत्तरकालं तु अहंकारतत्संकल्पजगदात्मनः प्रजापतेर्भेदस्तु द्विश्वतवनमविच्यत्येवेत्यर्थः ॥१८॥ एतद्ब्रह्मन्केदानामेत्यादि यन्मयाप्टष्टं एतन्मयात्तदुत्तयासु

केवलं समनुद्धान्तशब्दश्रवणवेधिनः ॥ अद्वये ब्रह्मबोधेऽस्मिन्द्वितामभ्युपगच्छसि ॥१३॥ न कश्चित्किंचिदेवेह न कदाचिन्न चेतति ॥
न कश्चिच्चेतन्योऽस्मान्न कदाचिच्च चेतति ॥१४॥ यदा त्रिभुवनाभासमीदृशं भाति सर्वदा । तदा मम समं ब्रह्म नेह नानास्ति किंचन ॥१५॥
न कदाचन जायते न मसःपादपाङ्कयः ॥ ब्रह्मणश्च जगन्नीतिमत्वाशान्तिपरा ब्रजन् ॥१६॥ उपदेश्योपदेशार्थे भेदे तावत्सरे त्वं धीः ॥ याव
न बुद्धस्तावत्त्वं भेदमभ्युपगच्छसि ॥१७॥ बोधस्य तु विशुद्धस्य न शास्त्रादिन शब्दधीः ॥ न भेदबुद्धिर्नो भेदः कि मप्येव प्रजापतेः ॥१८॥ श्रीराम
उवाच ॥ बुद्धमेतन्मया ब्रह्मन्प्रलतं तदुदाहर ॥ वचो मदवबोधार्थं यदुदाहृतवानसि ॥१९॥ किं तस्मिन्नश्वेति तेन तत्पदे संपद्यते परे ॥ बुद्धवान
स्मि पुनर्नाहं तस्मिनुपैमि किं ॥२०॥ श्रीवसिष्ठ उ० ॥ अहं ते सत्यमेतस्मिन्व्योमसत्ता प्रवर्तते ॥ द्विमूर्तसत्ता कालसत्ता च भेदसत्तापुनरिति च
॥२१॥ यदा क्लिष्टे हा हमित्ति दानाव्याहमित्यपि । भातीत्युदेति नानात्वं स्वात्मैव द्वेतमक्रमं ॥२२॥ व्योमात्मिका नामेतासां सत्ता नाम विधा
नधीः ॥ भविष्यत्युत्तरकाले तदा लाकाशमेव तत् ॥२३॥ एतस्मिन्नपि संपन्ने दिक्कालकलनात्मनि । अहंभावे निराकारे व्योममात्रपदेदि
॥२४॥ इदमाभाति भारूपं वेदनं दृश्यनामयत् ॥ स्वतो ब्रह्मैव निर्बीजं भवेद्ब्रह्मैव विराजते ॥२५॥ ब्रह्मैव शांतमजमेकमनादिमध्यं व्यो
मैव जीवकलनामिव भावयित्वा ॥ व्योम्न्येव पश्यति निराबरणे विसारि दृश्यं स्वरूपमथ वान्यदिवात्मचित्तात् ॥२६॥ ॥ इति महारा०
निर्वाणप्र० उत्तरा० परमार्थ निरूपणं नाम द्वादशोत्तर शततमः सर्गः ॥२१२॥ श्रीवसि ९०१

बुद्ध प्रकृतं तल्मद्य्यदं कार्याध्यासं निरूपयितुं प्रस्तुतं यन्मदवबोधार्थं वचस्तदुदाहर निरूपयेत्यर्थः ॥१९॥ तदेव स्मारयन्पृच्छति । किमिति । तस्मिन्
परे पदे अहंते चेतिति सति अनंते किं संपद्यते तत्सर्वं ब्रह्मैवाखर्वं बुद्धवानस्मि । अहं च तद्वचनश्रुत्वापुनर्न तस्मिन्नुपैमि अतो ब्रूहीत्यर्थः ॥२०॥ व्योमसत्ताअ
परपदे अहंते चेतिति सति अनंते किं संपद्यते ... अहंकाराध्यासस्योपरिच्छेदाध्यासं नाम्नुपपादयति । यदेति ॥ यदा अस्यद्वैदेहादौ अहमि
काराध्यासः भेदसत्ता त्रिविधपरिच्छेदाध्यासः ॥२१॥ अहंकाराध्यासस्योपरिच्छेदाध्यासं तान्नुपपादयति । ... दिक्कालरूपपरिच्छेदो वस्तुपरिच्छेदश्चेति
निभाति तदा देहश्रून्यस्थले त्रेमा हमित्येव स्वयं भानित्त्व देशपरिच्छेदः दृश्यमानादीत्या नानाविध कालपरिच्छेदो वस्तुपरिच्छेद स्वयाभेदाध्यासो भविष्यनी
स्वात्मैवाक्रमं द्वैतं भवत्युदेति । ततः परस्परव्यावर्तकजातिगुणक्रियादिप्रवृत्तिनिमित्तभेदकृत्यनामरूपभेदाध्यासो भविष्यनी
त्याह । व्योमात्मिकानामिति । एतासां उक्तानांपदार्थभेदसत्तानां अपि धनघीर्यचिरवाद्याध्यासः ॥२३॥ अन्नाहं कारबछेदेन जीवसाक्षिभेद
प्रावरणभावात्स्वाभाविकचिदेषिपथ्यको तत्राध्यस्तजगदाकारेण ब्रह्मैवाब्रह्मैव भास्यतीत्याह । एतस्मिन्नित्यादिद्वाभ्यां ॥२४॥२५॥ तदेवस्पष्टमाह । ब्रह्मेवेति
व्योम जीवजगदाकारं ब्रह्मैव जीवकलनामिव भावयित्वाऽध्यस्य निराबरणे जीवसाक्ष्याकाशे एव विसारि विस्तृततनरं दृश्यं पश्यति । स्वरूपमपि ब्रह्मान्य
दिवपश्यति । आत्मचित्तात्तानोदयंमर्यादीदृश्यस्येत्यर्थः ॥ ॥ इति श्री वासिष्ठतात्पर्यप्रकाशे निर्वाण उत्त० द्वादशोत्तरद्विशततमः सर्गः ॥२१२॥ ॥

वर्ण्यते पूर्वसंवाद इह रामवसिष्ठयोः ॥ गुरुशिष्याख्यायिकया सर्वं ब्रह्मेति निश्चितः ॥ विस्तरेणोपदेशात् रत्नकामलकवत्साक्षात्कारितमप्यात्म
तत्त्वं रामस्य जन्मान्तरीयस्योपदिष्टार्थ एव ते पुनरुपदिष्ट इति स्मारणेन स्थूणानिखननन्यायेन दृढीचिकीर्षुर्भगवान्वसिष्ठः सर्वं जगदुपक्षायस
वेदशास्त्रार्थसंग्रहरूपां उपदेष्टुमारभते । पश्येत्यादिना ॥ हे राम त्वं मम घमां प्रति यज्जगत्तत्त्वमात्मतत्त्वं च यथा पृष्टवांस्तथा पूर्वं अन्यस्मिन् राम
जन्मन्यपि अहं गुरुः शिष्य एवं सतात्वया पृष्टः ॥१॥ संक्षेपेण च विस्तरेणाहं पुरेति ॥ तत्र जागत्रत्वे रामः आत्माऽहं वसिष्ठः । आदिपदात्रयमि
वै रामदलिमामनं प्रश्नश्चेयं सुमादिकाद्दृश्यं चित्प्रतिभाकस्मिंश्चिद्वने गुरुशिष्यौ मनाइदानीमिवासीदित्यर्थः ॥३॥ इदं वक्ष्यमाणं दृष्टवान्
सि ॥२॥ सर्वस्य जगतो विषयेमम मे मुच्यमानं अतिसंज्ञापतेसंज्ञायं ॥४॥ हे पुत्र यथा स्वप्नपुरं सोषुप्तीं स्थितिं इयुष आत्मनस्तन्मात्रशे
षमशेषेण विनश्यति । तथा जगदिदं स्वयमपि प्रलये विनश्यतीत्यर्थः ॥५॥६॥ सर्वं जगदाभासस्याहं न व्योमाप्यध्यास्ते लयात् परित्यजयति ॥

॥ श्रीवसिष्ठ उ० ॥ यथा पृष्टवान् ध्यानं मां पारिनिषूदन । शिष्येणैव सता पूर्वं मद्दृष्टो गुरुरूपया ॥१॥ पुरा कस्येचिद्कस्मिंश्चिद्वै
दिक् मामालिका ॥ आसीदियं चित्प्रतिभा गुरुशिष्याभिकावने ॥२॥ गुरुस्तत्राहमभवं शिष्यस्त्वमभवस्तदा । पृष्टवान्मां समन स्थि
मिदमुद्दाम धीरधीः ॥३॥ शिष्य उवाच ॥ सर्वस्य भगवन् [illegible] धिमभे मम तिसंज्ञायं ॥ किं नश्यति महाकल्पे किं वस्तु न विनश्यति
॥४॥ गुरुरुवा० ॥ पुत्र शेषमशेषेण दृश्यमाशु विनश्यति । यथा न तथा स्वप्नपुरं सोषुप्ती स्थितिमीयुषः ॥५॥ निर्विशेषेण नश्यन्ति भु
वः शैलादि शोदश ॥ क्रियाकालः क्रमश्चैव न किंचिदवशिष्यते ॥६॥ नश्यन्ति सर्वभूतानि व्योमापि परिणश्यति । स सर्वजगदाभा
समुपलब्धुरसंभवात् ॥७॥ ब्रह्मविष्णुश्च रुद्राद्या ये हि कारणकारणं ॥ तेषामप्यतिकल्पान्ते नामापीह न विद्यते ॥८॥ शिष्य
ते हि चिदाकाशात्मव्ययस्यानुमीयते । तत्काले शेषतानेन संसर्गाद्भवहेतुना ॥९॥ शिष्य उ० ॥ नासतो विद्यते भावो नाभावो विद्यते
सतः ॥ इदं तत्कथमाभोगि विद्यमानं क्व गच्छति ॥१०॥ गुरुरुवा० ॥ नो विनश्यत एवेदं ततः पुत्र न विद्यते ॥ नासतो विद्यते भावो ना
भावो विद्यते सतः ॥११॥ यत्तु वस्तु तदेवास्ति न कदाचन किंचन । तदभावात्मतत्त्वात्मकं कथं नाम विनश्यति ॥१२॥ क्वस्थितं मृगतृ
ष्णाम्बु क्वस्थितो द्वीन्दुविभ्रमः ॥ क्वस्थिता केशव्योम्नि कल्यां यनुभवस्थिरः ॥१३॥ सर्वं दृश्यमिदं पुत्र भ्रान्तिमात्रमसन्मयं
॥ स्वप्नपुरमिवाभाति कथमेतन्न नश्यति ॥१४॥

उपलभ्यस्य भोगस्य भोक्तृधीनस्थितिकत्वात्प्रलयकाले उपलब्धुर्भोक्तुरसंभवात् ॥७॥ ब्रह्मादय एव तदा भोक्तारः स्वप्स्यंतीत्याशंक्याह कारणा
र्थमाह । ब्रह्मविष्णुश्चेति । अतिशायिते कल्पांते प्राकृते वैनाशिके च प्रलये ॥८॥ आत्मशेषं विनश्यतीत्युक्तं तदुपपादयति ॥ शिष्यतेहीति
अव्ययस्य चिद्वस्तुनो विवर्तेनैव चिदाकाशे शिष्यते इत्यनुमीयते । हि यस्मात्कारणात्स्वाध्यस्तसर्गाद्भवहेतुना ऽनेन चिदात्मनैव सर्वप्र
पंचस्य तत्काले शेषता सिद्धेति । तस्यापि नाशो निःसाक्षिकः प्रलय एव न सिद्ध्येदित्यर्थः ॥९॥ सतो जगतः असंभावलक्षणो नाश एव न सि
ध्यः शंकते । नासत इति ॥१०॥ श्रुतिप्रत्यक्षानुमानस्मृत्यादिसिद्धो जगतो नाशो नापह्नोतुं शक्य इति तदङ्गेन सत्त्वमेवापातदर्शनेप्रस
क्तमपह्नूयत इति नैष दोष इत्याशयेन गुरुः समाधत्ते । नेति ॥ नत्वेदुक्तं युक्तं यत इदं जगद्धि नश्यत्येव प्रत्यक्षादिभिः सावयवस्य नाशप्र
सिद्धेः । अतो न विद्यत एवेत्यसतोऽस्य भावो नास्तीत्यनुकूलमेतद्वयोक्तमित्यर्थः ॥११॥ यद्वस्तु तत्स्वयं एवं न तत्किंचन अभावात्मत्वं अस
त्त्वं । तद्भावः सद्भावः कथं नाम विनश्यत्यसत्त्वमापद्यते ॥१२॥ आपातदर्शनमात्रेणाजगतः सत्ता नावधारयितुं शक्या बहूनां तथा द
ष्टानां सत्त्वादर्शनादित्याह । क्वेति ॥ स्थिरः अर्थः प्रतिष्ठः ॥१३॥१४॥

दु

बोधत्वसाधनेजाग्रत्स्वप्नयोः॥१२स्पष्टं दृष्टांत भावः प्रसिद्ध दृष्टाद्दृ। शांतातीति॥१५॥ बाधितं तु कुतो गच्छति कुत्र तिष्ठतीति योगि भिरप्यदर्शनादस त्वमेव तस्य शरणमित्याशयेनाह। यथेति॥१६॥ यदि नास्त्येवेदृश्यं तर्हि दृश्यवेषेण कं चित्कालं परमार्थतः किं वस्तु भाति तदेव बोधोत्तरं पुनस्तथा न विभाति च कुत्र किमर्थमित्यर्थः॥१७॥ कचकचायते। शुक्तिरिव स्वचाकचक्येन रजतमिव स्फुरति॥१८॥ अस्येति दृश्यतादिवावस्था स्वरूपमूर्तं चेव स्मूर्तं चेत्यादिश्रुतेरिति भावः॥१९॥ यथाऽयं विनो वपुः स्वरूपमिव यथा वभेदमित्र मिवतद्वत्येत्यर्थः॥२०॥ यथाऽयं प्रसिद्धः स्वच्छा सितोदकस्य स्वच्छोद कस्यहृद स्यांतःप्रविष्टो बिंबप्रतिबिंबभेदस्त यादेकएव। आदितः हृदप्रवेशात्पूर्वमपि बिंबप्रतिबिंबभावादिभेदकुचनेः येकएवाक्षयोदस्त थाब्रह्मापि सर्गे सर्गक्षयेचाक्षयोदमित्यर्थः॥२१॥ चितिः चित्त्वे भावमव्ययंऽजे विकारि॥२२॥ यथा स्वप्ने प्रसिद्धजागजाग्रत्सुषुप्त्योः शांतम् मेव शाम्यति॥२३॥ बाधितं अतएव स्वास्थ्यं क्ष्यात्स्वांतं स्वाप्नं जगदन्यत्र देशांतरे तथैव विद्यते इति बोधदृष्ट्या न विद्यते हेपरेषां नरांणां स्वजीवाकाशस्य

६१४

शाम्यतीदमत्रेषेण तथा सर्वत्र सर्वदा॥ यथा जाग्रद्धियोः स्वप्नः स्वप्ने वाज्जगरो यथा॥१५॥ यथा स्वप्नः पुरं शांतं न जाने क्वाथ गच्छति॥ शांतं तथा जगद्दृश्यं न जाने क्वाथ गच्छति॥१६॥ शिष्य उ०॥ किमिदं भाति भगवन्न विभाति च किं पुनः॥ कस्येदं वस्तुनो रूपं चिद्व्योम्नोऽविततो हे तेः॥१७॥ गुरुरुवाच॥ चिदाकाशमिदं पुत्र स्वच्छं कचकचायते॥ यन्नाम तज्जगद्भाति जगदन्यन्न विद्यते॥१८॥ अस्येतद्वस्तुनो रूपं चिद्व्योम्नोऽवितताकृतेः॥ रूपमप्यजदेवाच्छं यदित्थमवभासते॥१९॥ कचनाकचनं सर्गक्षयात्मास्य निजं वपुः॥ व्योमात्मशुक्लं स्वच्छं स्याद्यथा वयविनो वपुः॥२०॥ यथायं स्वच्छसितोदांतरे कएवादितः कुचेः॥ तथाब्रह्मैव मच्छात्म सर्गे सर्गक्षये स्वयं॥२१॥ यथास्वप्ने सुषुप्ते च निद्रैकेवाक्ष यानिद्रा॥ सर्गे स्थितिप्रलये चैवं ब्रह्मैकं चितिरव्ययं॥२२॥ यथा स्वप्ने जगद्दृष्टुः शांते शाम्यत्यशेषतः॥ तद्वदस्मज्जगदिदं शांतं शाम्यत्य शेषतः॥२३॥ तदन्यत्रास्ति रवैरवाख्यं तथैवं जगद्विद्यते॥ अशांतं परवेत्तृत्वे तदेवस्मच्चिद्व्योम्नि संभवात्॥२४॥ यथैषा हास्मच्चिदाकाशाक चनं सर्गसंक्षये॥ तथान्यत्वे विदाकाशे नैवमित्यत्र का प्रमा॥२५॥ शिष्य उवाच॥ एवं चेत्तद्यथा स्वप्ने द्रष्टुरन्यः सेदृश्यधीः॥ विद्यते तद्वदन्यत्र मन्येऽस्ति जगदादिधीः॥२६॥ गुरुरुवाच॥ एवमेतन्महाप्राज्ञ स्वरूपं तु न तज्जगत्॥ चितिर्भाति स्वरूपेण तद्वदेवेन भाति च॥२७॥ न भाति न च तत्किंचिन्न च तत्किंचिदेव सत्॥ तच्चिदाकाशकचनं केवलं सदसद्द्दशोः॥२८॥ विद्यते तद्धि सर्वत्र सर्वस र्वेण सर्वदा॥ न विद्यते च तत्किंचित्सर्वं सर्वत्र सर्वदा॥२९॥

स्यतीति तु अशांत्यं शंका नहि। कुतः। अस्मच्चिद्व्योम्न्येवास्मद्वासनाप्रपंचस्य संभवादबाधितदशायामपि परचिद्व्योम्नि प्रसक्त्यभावादित्यर्थः॥२४॥ यद्यस्मदनुभवसिद्धः सर्गः प्रबोधबाधितः परसंविदाकाशे विरोधदापरस्य प्रबोधेन शुद्धचिदाकाशकचनं नास्तीत्येवकल्प्यं स्यात्तत्र चकल्पके प्रमाणं नास्तीत्याशयेनाह। यथेति॥२५॥ एवमुक्तरीत्याऽस्मत्संविद्द्विषयः परसंविदि न भाति चेत्तत्स्वप्नद्रष्टुरन्यः जाग्रत्पुरुषः। यथा स दृश्यधीर्विद्यते तद्व दन्यत्र प्रलयकालेऽपि अन्यत्र पुरुषांतरे जगदादिधीरस्तीति मन्ये संभावये॥२६॥ अभ्युपगमेन गुरुरुत्तरमाह। एवमेतदिति॥ अतएव प्रलये वैश्वजगत्सद्भावदर्शनं धातुः प्राग्वर्णितमिति भावः॥ यदि जगद्भ्रांतिः स्वरूपं स्यात्तदा सर्वसाधारणं स्यान्न तु न। किंतु चित्यध्यस्तं भाति तद्दृष्टु णामन्येषां तद्वदेव भाति चेति तत्रदनुभवानुसारेण व्यवस्थितं न तत्स्वरूपमित्यर्थः॥२७॥ साधारणेन न भातीत्यत एव तन्न च किंचित्तुच्छं न तु किं चिदेव सत्तत्त्वं तु तत्र जीवचिदाकाशकचनमात्रं तच्च सदसद्दृशोः॥२८॥ यद्यद्गृह्णाति चिदाकाशरूपेण विद्यते तस्मादुच्यते तदा जगत्सर्वेण प्र प्रकारेण सर्वत्र सर्वदा वर्तते स्वरूपेण न तु तत्किंचित्कुत्रचित्कदाचिदपि विद्यत इत्यर्थः॥२९॥ ॐ

५८

यतस्तद्द्वैवसतत्असत्यंअतो जगदादिपि सदसच्च भाति। यतश्चिदाकारं ननास्ति। अतस्तन्मयं जगच्च ननास्ति॥ यद्यस्मात् चिदाका
रामेवसर्गप्रलयरूपि॥२०॥ तदेवापरिज्ञायदुःखायपरिज्ञातंतुपरःशर्मसर्वदुःखक्षयायेत्यर्थः॥ तस्येयथापरिज्ञानं ज्ञानयोःसर्वत्र सर्व
दाविद्यतेनविद्यतेच॥ तस्यैवसर्वरूपेणसर्वत्र विद्यमानतो प्रपंचयति। एषदेवइत्यादिना॥२१॥२२॥२३॥ भवोजन्म॥२४॥२५॥२६॥
णाभवेनदर्शनेनणादयः सर्वे पदार्थाः प्रत्येकं सर्वं कर्तारः भोक्तारः सर्वेश्वरेश्वराश्चेत्येतदपिप्रपंचयति। ब्रह्मात्मतादित्यादिना॥२७॥
सर्वेषामीश्वरत्वाभिद्धादीनामीश्वरः॥२८॥२९॥ सर्ववस्तूनांप्रत्येकमेकमेकंवस्तु कर्ता भोक्तापरात्परःश्रेष्ठादपिश्रेष्ठः॥४०॥ स्व
यापत्यगात्मस्वरूपस्य॥४१॥ यस्मिन्रूपेदृश्ययोर्दृश्योदर्शयोर्विभातत्वाद्दृशां सर्वरूपं एवंरूपाविभुतेवस्थितः॥४२॥ उक्तेऽर्थे वादिनामनुभवंसंवाद
वोऽस्त्यर्थ इति येषांवास्त्योऽर्थः येषामिति वास्त्येवविज्ञानातिरिक्तोऽर्थोऽस्तियेषां स एवकर्ता भोक्ता च यथा वैशेषिकसांख्यनैयायिकादीनां येषां तु वादि

दा तत्सन्तत्सर्वसर्वमसच्चासदिवाखिलं॥ तन्मयं तच्चिदाकारं ननास्ति न च नास्तितत्॥२०॥ यन्नामसच्चिदाकारं सर्गप्रलयरूपितत्॥ तदुःखायापरिज्ञा
तं परिज्ञातं परः शर्म॥२१॥ विद्यते सर्वथैवेदं सर्वं सर्वत्र सर्वदा॥ न विद्यते सर्वथा च सर्वं सर्वत्र सर्वदा॥२२॥ एष देवो घटः शैलः पटः स्फाटं स्ततोव
टः॥ तृणमग्निः स्थावरं च जंगमं सर्वमेव च॥२३॥ अस्ति नास्ति च शून्यं च क्रियाकालं नभो मही॥ भावाभावौ भवो भूतिर्नीरागः परागः शुभा
शुभाः॥२४॥ तन्नास्त्येव न यन्नाम नित्यमेकस्तथा वदि॥ आदिमध्यमथान्तं तु कालत्रितयमेव च॥२५॥ सर्वं सर्वेण सर्वत्र सर्वदैवात्र वि
द्यते॥ सर्वं सर्वेण सर्वत्र सर्वदात्र न विद्यते॥२६॥ यदेवं नाम सर्वात्म सर्वमेवास्ति सर्वदा॥ ब्रह्मात्मतात्तत्त्वं च स्वसंवित्पुरन्यायेन वेत्तदा॥
२७॥ तृणं कर्तृ तृणं भोक्तृ ब्रह्मात्मत्वात्तृणं विभुः॥ घटः कर्ता घटो भोक्ता घटः सर्वेश्वरेश्वरः॥२८॥ पटः कर्ता पटो भोक्ता पटः सर्वेश्व
रेश्वरः॥ दृष्टिः कर्ता दृष्टिर्भोक्ता दृष्टिः सर्वेश्वरेश्वरः॥२९॥ गिरिः कर्ता गिरिर्भोक्ता गिरिः सर्वेश्वरेश्वरः॥ नरः कर्ता नरो भोक्ता न
रः सर्वेश्वरेश्वरः॥ प्रत्येकं सर्ववस्तूनां कर्ता भोक्ता परात्परः॥४०॥ अनादिनिधनो धाता सर्वब्रह्मात्मकं यतः॥ तृणकुंभादयस्तेनैते स्व
याविभुतयाविभुः॥४१॥ एवंरूपास्थितारूपं यद्विभातः स्वयोर्दयोर्वास्त्योऽर्थोऽस्त्येवेह कर्ता भोक्ता तथा विधः॥४२॥ विज्ञानमात्रमेवास्ति स
कर्तृ भोक्तृ तथाविदां॥ ... क्वचिच्चैव कर्तेह न च भोक्ता तथाविदां॥४३॥ यस्मिन्दीश्वर एवेह कर्ता भोक्ता तथा विदां॥ सर्वमेव पदेतस्मिन्सं
भवत्युन्नमोन्नमे॥४४॥ विधयः प्रतिषेधाश्च केनेसंतिन संतिके॥ शुद्धे चैव चिद्व्योमदृश्येनापि वभासयत्॥४५॥ समात्मात्मनेजगदिति
पत्रनिष्ठेदनामयं॥ सर्वादृष्टो विधिनिषेधदृष्टाश्च सर्वाः संकल्पवेदनविशेषस्य ... पूर्वाः॥ सत्यासिक्ताः सततमेव न चैव सत्यास्वरूप
शान्तमवमत्रयतः स्वरूपं॥४६॥

विज्ञानमात्रमेवास्ति न तथाविदां तेषां तदेव कर्तृ भोक्तृ च शून्यवादिनां तु न देवेसाह॥ न कश्चिदिति॥४३॥ पाशुपतादीनां कश्चिन्नस्य क्रियाप्रसिद्ध ईश्वर
एव कर्ता भोक्ता च। एवं मतभेदेपि न वादिनां मध्ये कस्यचिदपि असंभवदर्थवादित्वं येन तस्मिन्नुन्नमोन्नमे सर्वत्र सर्वशक्तिमति सर्वात्मकेपदे सर्वमपि संभवति
॥४४॥ तस्मिन्पदे तत्तद्वाद्यभिमताः परस्परविलक्षणाः पदार्थप्रक्रिया साधनानुष्ठानफलादिविषयाः परस्परलिताः स्तस्प्रतिषेधाश्च सर्वे ... विरोधेनासत्कीर्णाः सं
तीति। ... तत्र ... ध्यवच्छिन्नचैतन्यैवरशापन्यायेन यथास्वसंकल्पनं व्यवस्थित विवर्तसंभवान्तत्र तत्र चिद्व्योमशुद्धस्वात्मनि तत्र दासत्तानुसारिदृश्यतामिव भावय
सत् ... दृष्टवा ... स्य मात्मानं तादृशां तादृशोनैव नादिनिपश्यन्ते तत्र तत्र वस्तुतो नामयमेवतिष्ठेत् स्वच्छात्तुं शीलमित्यर्थः॥४५॥ हे राम सर्वे पांजीवानां सर्वाः स्वस्वानुभवसि
द्धाः पदार्थादिदृशः सर्वाः परस्परविलक्षणा विधिनिषेधदृष्टाश्च यस्मात्तत्तत्संकल्पतेनदेदनविशेषतत्सदनुभवशोषवाप्तनासहिततन्तत्स्वकर्मफलपूर्व
कास्तस्मात्तत्तद्व्यवहारेसततमेवमेवतत्तदर्थक्रियासमर्थत्वात्सत्याभिमताः॥ परदृष्ट्यानुप्रतीतेरेवाभावान्नचैवसत्याः। शान्तं गतस्याः। यतः प्रत्यगात्म
रूपं परमिति शेषः॥४६॥

हे राम पुरा पूर्वयुगे तया शिष्यतया स्थितात् गुरोर्मम अंतिकात् एवं वर्णितमुपदेशानं श्रुतं तेनोपदेशेन त्वं तदा न चासि बुद्धवान् ततस्तदनंतरं भवबोधदोषादेव पुनर्गर्भवा
सपुनर्भवादन्यजगदनुभूय अधुना अस्मिन् जन्मनि तापोपशमादिह दशरथस्य गृहे जातोसि तदेव प्राक् अप्रतिपृष्टमधुनापि मां पृच्छसि ॥४७॥ अत्रापि लयान्मदुपदिष्टं ज्ञानं संसतत्वरामोथ
सुगोचरं अत एव संसारलक्षणायाः दीर्घरजन्याः स्तापनतो निवृत्तत्वात् सितरश्मिः पूर्णचंद्रस्येव बिंबमिव स्थितं ज्ञानं अखिले समसंकृते तेन त्वं मोहं अज्ञानं उत्साय
तिष्ठ ॥४८॥ हे राम त्वं विमलस्वभावे तपति सर्वतः प्रकाशमाने सत्त्वे स्थितः आत्मनि सर्वदृश्यपदार्थमुक्तः तिष्ठ त्वं निर्वाणो निरतिशयानंदनिमग्नः अत एव त्वं ज्ञा
तामतिर्यस्य तथाविधः सन्नंबरकोशमिव कांतः मनोहरः नीरागः सन् धर्मेण राज्यमनुपालय यस्य सम गतार्थ मा री ॥४९॥ ॥इति श्रीवा० ता० प्र० रा० नि०
वाल्मीकीये ब्रह्मप्रकरणे उ० त्रयोदशोत्तरद्विशततमः सर्गः ॥२१३॥ उपदेशप्रशंसात्र श्रीवृष्टौ तत्कृता ॥ दिव्यश्च मानुषश्चैव वर्ण्यते सुमहोत्सवः ॥ महतः

इति ते शिष्यतया मदंतिकाच्छ्रुतं पुरा तेन न चासि बुद्धवान् ॥ ततोनुभूयान्यजगत्कदर्थनां निजाद्भ्रमाज्जातोसि तदेव पृच्छसि ॥४७॥ ज्ञानं सदेनद
स्विलं कृतमत्र मंचितं संसाररूढं रजनीसितरश्मिबिंबं ॥ जीतस्त्वमभ्युदयवानमलैकबोधस्तत्सार्य मोहमनुतिष्ठ यथागतं स्वं ॥४८॥ तिष्ठ त्वदा
त्मनि परे विमलस्वभावे सर्वं स्वके तपति सर्वपदार्थमुक्तः ॥ निर्वाण आनंदमतिरंबरकोशकांतो धर्मेण राज्यमनुपालय तीर्णतृष्णः ॥४९॥ ॥इति श्री
रामायणे निर्वाणप्रकरणे प्राकृत रामनिर्वाणोपाख्याने त्रयोदशोत्तरद्विशततमः सर्गः ॥२१३॥ ॥श्रीवाल्मीकिरुवाच ॥ इत्युक्तवत्यथ मुनौ
त दिवसांतघनौघगरागावतावपूर्ते सितकेरकौरवारिताः ॥ भुवि नभस्तलकुसुददनात्तुषारवर्षोपमा भुवि पपात च पुष्पवृष्टिः ॥१॥ किंजल्कजा
लांतकालकपिशप्रभुजालाः खांतस्थिताःस्वर्गद्रुमाश्च तिततमाश्च विडंबयंती ॥ ताराङ्गणं प्रविततभासमनल्पहासं स्नोत्रास्मुरपुरादिव पुण्यलक्ष्मीः ॥२॥ साफु
ल्लसा पुष्पवृष्टिरथ दुंदुभिनादगर्भा किंजल्कपुंजमलदाम समाजगाम ॥ आप्रहरिताखिलसभाहि महाद्रिपुष्पपूरेण कौतुकविकास
करीक्षणेन ॥४॥

शास्त्रस्यांते देवैर्मनुष्यैश्च कृतं गुरुद्विजसुरपितृसज्जनपूजनमहोत्सवलक्षणं मंगलं वर्णयिष्यन् वाल्मीकिरुवाच ॥ इतीत्यादिना ॥ मुनौ वसिष्ठे इति वाक्यं
उक्तवति सति अथो आमरः अमरसंबंधी दुंदुभिर्वर्धितं अम्बरेनपूर्णमत्यमभिवनदा ॥ द्रुमसमूहः शुक्लः नान्यथा दिवसांतघनाइवश्वेताः अंगरागाय स्याः तथाप्युदोत्थाम्
अत एव तुषारवर्षोपमा पुष्पवृष्टिश्च भुवि पपात ॥१॥ सा च पुष्पवृष्टिः किंजल्कजालानि यदिवसांतघनाइवश्वेताः अंगरागाय स्याः तथापि द्रोदयोत्थाम्
द्वः दीकृतएव व्रातः तन्यंगानि यस्याः वाताव धूताः केसरा एव गोचराः तस्याः स्तथाविधा सुरपुराद्यथा मेवोसवदत्तनायभुवं प्रासा पुण्यलक्ष्मीरिव स्थितेत्यु
त्प्रेक्षा ॥२॥ पुनः कीदृशी सा पुष्पवृष्टिः कुस्यां तकाले दृष्टलोपः कपिशं प्रमेदः स्यात् तेन कुंचिताः भुवाः कत्व द्रुमराग एवादिक्षमालपुरलोकमेदरूपरागरंजो श्रेयस्य
नथाविधा स्वर्गीस्य स्यात् द्रुमादाश्च पतितं आस्तामुखेषु इति निपातनात्यप्रस्तीति भेख स्वर्हारा कोशस्य सत्थाविधं प्रचितभासं तारागणं अंबरस्थाम
तीयत्नस्य हासं यथास्यात्तथा विडंबयंती तारागणप्रचित हासं भेदं च विडंबयंतीत्यर्थः ॥३॥ सादुंदुभिनादे गीर्जीनूकिंजल्कपुंजमलदाम
लो भिहीयस्या स्तथाविधा हिमवतहारिणा मनोहरेण पुष्पपूर्णेन पुष्पप्रवारेण आपूरितो आखिलो सभा यया तथाविधा अत एव ईक्ष
णेन दर्शनेन कौतुकविकासस्य आनंदविस्तारस्य करी सा पुष्पवृष्टिः अथ रामसमाजमाजगाम ॥ ईक्षणेनद्रष्टूजनानेत्रेण सह कौतुकवि
सकरीति वाक्षणेन राममाजगामेति योज्यं ॥४॥

यथानभिनिसर्वेल्लितस्थानेवसिष्ठस्तसंनिहितेमुनयस्तत्संनिहितेदशरथादयस्तत्संनिहितेमंत्रिसामंतास्तदवांतरेगमाः प्रजाश्चेत्येवंक्रमेणावस्थिताः
सभ्यास्तानिदिव्यानिपुष्पाण्युपायनवसिष्ठचरणेषु पुष्पांजलिंदत्त्वावसिष्ठाय नमस्कृत्यपुष्पैस्तोरणैश्चत्यादिसंपर्कैः खेददोर्गंध्यादिसंशोधितांशोगाक्ष्यं
वाश्रमादिप्रयुक्तंशोकवर्तांजन्ममरणादिसर्वशोकवर्तांचगतवस्तेभुः॥५॥संसारदुःखक्षणाद्धितत्तात्तेरतिदीर्घात्ताराद्रचिरंश्रांताः वयंत्वदनुग्रहोपदेशात्
सुविराः सुखेनप्रवेष्टुंशक्यआत्मायेषांतथाविधाःसंतः सौम्ये त्वेवात्मनिचिरंविश्रांताः अहोइत्याश्चर्ये। यथाशुद्धाजाड्यकालुष्यनिर्मुक्ताःशरन्मे
घाः अचलेहिमवदादौविश्राम्यतितद्वत्॥६॥ किंचास्माकंकर्मणांपुरुषार्थसिद्धयेअवश्यकर्तव्यानां अवधिःपूर्णताप्रहीणत्वसंपन्नेत्यर्थः॥ आ
पदांचसीमानापरमावधिर्दृष्टः। तत्कुतःस्तत्राह। ध्यानमिति॥७॥ सर्वेषांतृतीयांतुपादानावष्टश्लोकैः एवमादिभिरन्यैश्चदृष्टांतैर्हृदयदृष्टिर्मार्जितेत्य
त्रान्वयः ध्यानेनलब्धंकल्पितंपरंअनंतंव्योमनभश्चिरंविहायअनुभवनमभिः लीलोपाख्यानादौप्रदर्शितैःधारणायाःसर्वाधारब्रह्म

नानिदिव्यानिपुष्पाणिपथास्थानमधःस्थिताः॥ वसिष्ठायनमस्कृत्वासभ्याः संशोधितात्मनः॥५॥ श्रीदशरथउवाच॥ अ
नुसुविशात्मानःसंसारवितताक्षतेः विश्रांताःस्मश्चिरंशांताःशुद्धामेघाइवाचले॥६॥ कर्मणामवधिःपूर्णोदृष्टःसीमातआपदां॥ ज्ञा
तंज्ञेयमशेषेणविश्रांताःस्मःपरेपदे॥७॥ ध्यानलब्धपरव्योमचिरानुभवनभ्रमैः॥ धारणाधारविश्रांत्यादेहसंसृजेन
क्रमैः॥८॥ संकल्पनवनिर्माणैः स्वप्नदृष्टिजगज्ज्वरैः॥ मुक्तिस्थानुभवनैःस्वप्रात्मस्फूर्तिदर्शनैः॥९॥ ऐंदवनैःपवे
नस्पंदैरन्यैःसलिलउद्भवैः॥ इंद्रजालपुरापूरैर्गंधर्वनगरोत्करैः॥१०॥ मायापूर्णपुराभोगतत्त्वज्ञानदरीरथैः॥ आयतोप
वनस्पंदैर्दिव्यज्ञानुभवोदयैः॥११॥ मदभ्रांशोपुरस्पंदैर्मुधात्ववनिकंपनैः॥ बालयक्षाद्यनुभवैःस्वदेहोड्डुकदर्शनैः॥
॥१२॥ एवमादिभिरन्यैश्चदृष्टांतैःस्वानुभूतिदैः॥ अहोनुमार्जिताहृदयदृष्टिर्नवतामम॥१३॥ श्रीरामउवाच॥ नष्टोमो
हःपदंप्राप्तंत्वत्प्रसादान्मुनीश्वर॥ संपन्नोहमहंसत्यमत्यंतमवदातधीः॥१४॥ स्थितोस्मिगतसंदेहःस्वभावेब्रह्मरूपिणि॥
निरावरणविज्ञानःकुर्येवचनंतव॥१५॥ स्फुरत्तास्फुरत्तात्मतासिद्धसोरव्यदंवचनंतव॥ अर्हितोपिचरांतोपिदृष्टामीवमुनेमुहुः॥
१६॥ नैवमेपस्त्वेतेनार्थोनाकृतेनेहकश्चन॥ यथास्थितोस्मितिष्ठामितथैवविगतज्वरः॥१७॥ उपायस्तुनथातेनदृष्टिर्वास्तीहकीदृशी॥ अ
होनुचितताभूमिःकष्टमेतादृशीदशा॥१८॥ नरानुनेचमित्रेमेनक्षेत्रंदुर्गतीरेनः॥ दुर्बोधेषाजगत्स्वप्ना शांतासर्वार्थसुंदरी॥१९
॥ कथमेतांजनोदेविविनाभवदनुग्रहं॥ विनेवसुंपोतंवाबालोविंलंघयेत्कथं॥२०॥

णविश्रांत्यादेहसंसृजनक्रमोपिलीलयावर्णितएव॥८॥ स्वप्नेआत्मनःस्वचमत्निदर्शनैर्हरिश्चंद्रादौप्रसिद्धैः॥९॥१०॥ माययाप्रदर्शितजलपू
र्णपुराभोगैः अयनोत्सवैभिरकालेप्रलयेवर्णितेश्चडपवनस्पंदैः॥११॥ मदाद्विवेकभ्रंशोप्रतीयमानैःपुरस्पंदैः मुधाउत्पातादिनाभूभाभूभ
सूचनंविनेवभ्रांत्याप्रतीतैरवनिकंपनैः केशोंडुकदर्शनैः॥१२॥१३॥ सुप्रबुद्धेनैवसंपन्नः॥१४॥१५॥ अर्हितःपूजितः अपिचेत्यनेनापमानित
श्चसमदर्शिनेनहर्षविषादानुदयाद्दृष्टोतोपदृष्टस्त्वत्प्यामीव॥१६॥ यथापूर्वंव्यवहारेस्थितोस्मितथैवसांप्रतंतिष्ठामि। विगतज्वरःव्यवहारप्रसक्त
संतापशून्यः॥१७॥ तेनत्वद्वचनेनयादृशोविश्रांत्युपायोलब्धस्तथाउपायस्तुकोन्यःस्यात्दृष्टिर्वाअन्याकीदृशीस्यात्॥ अहोनुचितेनाअपरि
च्छिन्नाविश्रांतिसुखभूमिर्मयाआसादिताएतादृशीजन्ममरणाघनंतानर्थसंकुलोसंसारदशाअहोनुकष्टंप्राणिनामित्यर्थः॥१८॥ ममनुदुःख
निमित्तानिकान्यपिनसंतीत्याह। नराज्ञुरिति॥ क्षेत्रंशरीरंबांधवंचजनः स्वजनःएषास्वात्मचिदेवयावदुर्बोधानावत्स्वप्नादुःखदाजगदभूत्। सादृशा
इदानींतुबोधात्शांतासर्वार्थसुंदरीसंपन्नेत्यर्थः॥१९॥ हेभगवन्त्वदनुग्रहंवि

जन्मांतरेषु नंतज न्मदुर्वासना प्रयुक्तसंशयानां नाशेनेन तथा जन्मांतरोपचितानां पुण्यानां तामां उदय बोधप्रलोन्मुखत्व येन तथाविधेन मुनिवचः कृतेन प्रतिबोधनेन जातः विचारेण मोयस्मिंस्तथाविधे मे मनसि अद्य चेदृद्व परमाह्लादकारी परमात्मप्रकाशो जातः इत्यर्थः॥
२१॥ इदृश्यां निरतिशयानंदप्रकाशरूपायां आत्मदृशि भवादृशाम हानुभावोपदेशानिस्या परोक्षतयाद्दृश्यमानायामपि अयं लोकः जनः तयाप्रसि
द्धयास्व दुर्भगतया दौर्भाग्यवशेन महत्सेवा शुश्रूषादिहीनः सन् स्वरागद्वेषाहंकार जन्ममरणादि दोषदशाशांतेः कामुवद्धिया निशं दह्यते न दाक्षव
र्धमित्यर्थः॥२२॥ वेत्तेति हर्षे सामान्योवेत्तेति वत्॥२३॥ संपदां उत्कर्षे सीमांतः आत्मानि रति शयानंदरूपत्वात् दृष्टीनां सीमांतः आत्मदृष्टेरेव विद्या
नेन सर्वविशेषानात् शास्त्राणां सीमांतोऽध्यात्मशास्त्रं चरमप्रमाणत्वात् पशुपुत्रधनादिनाशलक्षणानां आपदां सर्वसंसारनाशः सीमां
य उत्तरमन्योनाशो नास्ति काव्यरसालंकारशालिनां गिरां वसिष्ठोक्तिः सीमांतः दृष्टानां सुखविश्रांतिहेतूनां प्रासादरामगिरिनदीपुलिनादिदेशानां परमा

श्रीलक्ष्मण उवाच॥ जन्मांतरोपचितसंतापनाशेन जन्मांतरोपचितपुण्यपाकेन दिनेन॥ जातोद्य मे मुनिवचः परितोषणेन ज्ञातो द्य मे मनसि चंद्र इ
व प्रकाशः॥२१॥ ईदृश्यां दृश्यमानायां दृशि दोषदशाशांतेः॥ काष्ठवद्दह्यते लोकः स्वदुर्भगतया तया॥२२॥ विश्वामित्र उवाच॥ अहो वत मह
त्पुण्यं श्रुतं ज्ञानं मुनेर्मुखात्॥ येन गंगा सह स्नातास्मा ताद्व वयं स्थिताः॥२३॥ श्रीराम उवाच॥ संपदामथ दृष्टीनां शास्त्राणामापदामपि
रां॥ देशानामप्यदृष्टानां दृष्टः सीमांत उत्तमः॥२४॥ नारद उवाच॥ यन्नश्रुतं ब्रह्मलोके स्वर्गे भूमितलेऽपि तथा॥ कर्णयोर्न ज्ञानमाकर्ण्यो
याते मे द्य पवित्रतां॥२५॥ लक्ष्मण उ० हार्दं बाह्यं च तिमिरमपास्त्वं नाल्पया॥ मुनेः परमभानुत्वेन नः संप्रदर्शितं॥२६॥ शत्रुघ्न
उ०॥ निर्वृतोऽस्मि प्रशांतोऽस्मि प्राप्तोऽस्मि परमं पदं॥ चिरायपरिपूर्णोऽस्मि सुखमासिचक्रवत्॥२७॥ श्रीदशरथ उ०॥ बहुजन्मोपलब्धेन पु
ण्येनायं मुनीश्वरः॥ धीरः कथितवानस्त ब्धेन पावनतां गताः॥२८॥ श्रीवाल्मीकिरुवाच॥ इति मुनिवरवक्त्रसभ्येषु सद्भूप्तता॥ वसिष्ठः सउ
वाचेदं ज्ञानं पावनमाशिषा॥२९॥ राजन् रघुकुलेदोय दहं वाचिनक्रुरु॥ इतिहासकथांतेहि पूजनीया हि जातयः॥३०॥ तेद्य ब्राह्मणोघास्तेषम
र्वकामैः प्रपूरय॥ वेदार्थं सम्यगनुष्ठानफलं प्राप्यसि शाश्वतं॥३१॥ मोक्षोपायकथाविवक्तृ समाप्तौ हि जपूजनं॥ शक्तितः कीटकेनापि कार्यं
किंतु महीभृता॥३२॥ इति मौनं वचः श्रुत्वा सहस्रशोऽग्निन्नपोद्रशा॥ दृनेरक्षरायामास द्विजानां वेदवादिनां॥३३॥ मथुरायां सुराष्ट्रेषु गौडेषु च
वसंति ये॥ तेभ्यः कुलेभ्यः सोत्यर्च्य समानीय द्विजन्मनां॥३४॥

शांतेर्देशाः परमविश्रांतिहेतुत्वात् सीमांतोऽद्य दृष्ट इत्यर्थः॥ सर्वत्र परमात्मैव वापरमसीमांत इत्यर्थः॥२४॥२५॥ परमं प्रसिद्धभान्वपेक्षया उत्कृष्टं भानुत्वं
॥२६॥२७॥ नः अस्माभ्यं तस्मै रमापावनं वस्तु शास्त्रं वा कथितवान् येन पावनतां गताः वयमिति शेषः॥२८॥ इदानीं श्रीवसिष्ठो मंगलमध्यानि मंगलांता
नि शास्त्राणि प्रथंते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवंति। अध्येतारश्च मंगलयुक्ताः यथा स्युरिति महाभाष्ये भगवत्पतंजलिनोदाहृतां श्रु
तिमनुसृत्य निर्विघ्नं समाप्तस्य महतः शास्त्रस्य शास्त्रोक्तफलसिद्ध्यर्थं ब्राह्मण देवपितृपूजनपूजोत्सवादिमंगलमेवचितस्य ज्ञानमुखेना ज्ञापयतिराज
जन्नित्यादिना॥२९॥ पूजनीयाः इति विद्योचितयोः सर्वे॥३०॥ वेदार्थः प्रसिद्धेश्रवणविध्यर्थस्तस्य सम्यगनुष्ठानं सांगतया निष्पादनं
श्रवणविधेः काम्यविधितया सांगानुष्ठानादेव फलसिद्धिरिति भावः॥३१॥ कीटकेन कीटकेवद्दनाद्यशादरिद्रेणापीत्यर्थः॥३२॥ मुनिना प्र
क्तं मौनं वचः गुर्वाज्ञायाः शिरसा धारणीयत्वान्मौनं निरुत्तरं यथा स्यात्तथाश्रुत्वेति॥३३॥ कुलेभ्यः कुलश्रेष्ठेभ्यः पृथक्पृथक्समुदितेभ्यश्च॥३४॥

रा०टि

६१६

५८

अधिकेभ्योऽप्यभिकं दानं यथा तत्र दत्तं तेन ानुपकम्पप्रवृत्तं द्विजभोजनं येन ३५ पितृन् श्राद्धादिना देवान् आलम्भमोदकोपहारादिना इ
ष्टादिना च नृपान् पनिरत्नादिना ३६ मुहुर्मुहुर्मनैः सह उत्सवं च कारेमु तत्रान्वयः ३७ लब्धः संसृतिसीमान्तो येन अत्रापि सह सुहृज्जनै
रिति योजनीयं ॥ ३८ ॥ गीर्वीणनगोमिरुः कुत्येषु मञ्जन्त इत्सुंदरे ॥ ३९ ॥ चत्वाले नात्र मुरजी क्रियाविशेषणे ॥ ताडनं तत्र कीर्तयति अन्योन्येत्यादि ना । अन्यो
न्येतरं परस्परं विलक्षणं यथा स्यात् तथा स्विकुरबंधनालंकारभेदादिना रचिताः शेखरा याभिः ॥ ४० ॥ क्ष्वेडि रणिता नाम् तरलतरत्नश्राविता नां
पणानां विविधाभिनयव्यवहारवतां कराणां स्तोतिः परितः पल्लवितमिवांबरं कांतवस्त्रं च यासां हास्यरसाभिनये मुग्धैर् दृष्टैर्हासैर् विक्षिप्ताः परितः मा
प्रक्षिप्ताः दंतेदु किरणच्छटा याभिः ॥ ४१ ॥ वीररसाभिनये मदाकुलितहुंकाराः करुणाद्भुतादिरसाभिनयलीलासु तरलस्वराः शृंगाररसाभिनये
अभिनये एकपादतलाघाते नहेलया हतं ताडितं धरातलं याभिस्ताः ॥ ४२ ॥ शृंगारक्रोधाद्यभिनयेष्वङ्गाभिर्वेधूननेन तारैः क्षेत्रे रिवविग

॥ अधिकात्यधिकदानप्रहृतद्विजभोजनैः ॥ नदादत्रासहस्त्वाद्ग्निभोजयामास भूपतिः ॥ ३५ ॥ यथाभिमतभोज्यान्नदानदक्षिणया तया ॥
एवं संपूज्य नाविप्रान्पित्रीन्देवानल्पपोस्तथा ॥ ३६ ॥ पौरामात्यांस्तथा नृत्यादीनां धनेषु पणोंश्च तान् ॥ तस्मिन्दशरथो राजादिनेसह सुहृज्जनेः
॥ ३७ ॥ लब्धसंसृतिसीमांतश्चकारोत्सवमुत्तमं ॥ तथा नृपगृहे तस्मिन्नौनोयमणिकाचनैः ॥ ३८ ॥ भूषितेन गरेश्चैव गीर्वाणनगसुंदरे ॥ नन्तनु
मत्तकामिन्यो विलासिन्यो गृहे गृहे ॥ ३९ ॥ लसद्वंशालताकांस्यवीणामुरजमर्दकं ॥ तांडवेनोद्धतेरावमन्योन्यतरशेखराः ॥ ४० ॥ क्ष्वेडि
तापणकरभ्रांतिपल्लविनांबराः ॥ मुग्धाट्टहासविक्षिप्तदंतेदुकिरणच्छटाः ॥ ४१ ॥ मदाकुलितहुंकारा लीलासुतरलस्वराः ॥ एकपा
दतलाघातहेलाहतधरातलाः ॥ ४२ ॥ स्रग्दामतारविगलत्कुसुमासारपांडुराः ॥ धारापतितविच्छिन्नहारमुक्तोत्सवलसद्गाः ॥ ४३ ॥
लोलाभरणसाकारकामनन्दनतुरंगनाः ॥ पेतुःस्फुटपदं विप्रा वंदिनो प्यंगनाश्च ताः ॥ ४४ ॥ पपुरुतांडवं पानं पानपामदशालिनः ॥ भो
ज्यं बुभुजिरे चित्रं भूषिता भोजनार्थिनः ॥ ४५ ॥ सुधाधिप रिलेपेन रंजिता गृहभित्तयः ॥ रेजू रामेदु भाने न पुष्पधूपविलेपनैः ॥ ४६ ॥
वासांसि विवसिताश्च त्राण्युत्तमस्रग्विभूषणाः ॥ चेरुः परिचराश्चैव श्वारुगंधानपाद्युरे ॥ ४७ ॥ देहयष्टिपुंसयोऽप्यवनितो
यक्षकर्दमं ॥ आपुस्तांडवनर्तक्यः शृंगारात्मास्यानरं ॥ ४८ ॥ नवबकुलनिशावसान हर्षादितिघनमुत्सवमेव समराजत्र ॥ दशर
थनृपतिः सदानभोगश्रियमकरोत्सदमञ्जयं समेतः ॥ ४९ ॥ ॥ इति महारा० निर्वा० प्रक० महोत्सववर्णनं नाम चतुर्दशोत्तरद्विश० २१४ ॥

लोद्भिः कुसुमासारैः पांडुराः जलधाराइव पातिताः येऽविच्छिन्नाः हारास्तेषु देवासदन्या सेत्सव लसद्गाः ॥ ४३ ॥ लोलैराभरणैः साकारं
लोद्भिः कु सुमासारैः पांडुराः जलधाराइव पातिताः येऽविच्छिन्नाः हारा स्तेषु देवासदन्यासेत्सव लसद्गाः ॥ ४३ ॥ लोलैराभरणैः साकारं
कामदर्शयंत्यइवेति शेषः ॥ साकारं सत्रिमाकारसहितं यथा स्यात्तथा कामं यथेच्छं नन्दते रिति वा पेतुर्यथा क्रमं वेदस्तवगीतानि ॥ ४४ ॥
तिपुपानपाः अपि प्राः पानं मध्यान्सवं पपुः ॥ विप्रादयस्तु भोजनार्थिनो भोज्यं भाजनार्हं चित्रं नाना भक्ष्यादिवैचित्र्ययुक्तं चतुर्विधमन्नं बुभु
जिरे ॥ ४५ ॥ रामलक्ष्मणस्येदोर्भानं नदेह प्रभा चन्द्रिकया पुष्पधूपविलेपनैश्च रेजुः ॥ ४६ ॥ नृपस्याध्वरे उत्सवे यते ॥ ४७ ॥ कर्पूरागरु
कस्तूरिकं कोलैः समष्टं चंदनं यक्षकर्दमः तं देहयष्टिपुंसयोऽप्यविलिप्य तांडवनर्तक्याः वनिताः शृंगारात्मा अंगणांतरं राजसभागणं
मध्यं ते प्रापुः ॥ ४८ ॥ दशरथनृपतिरुत्सवं ब्रह्मपदं प्रपन्नैः सन्नवैः संसाररत्नैलक्षणया बकुलनिशावसानपक्षे रात्रिस्य स्याः अव
सानं समाप्तौ घस्रद्वयेन नाराः तस्य पुत्राद्युदयैर्हर्षातिशयसत्रमित्रिवर्णितप्रकारं सदानभोगश्रियं दानभोगाभ्यां भासहितं घनमुप
चितमुत्सवमेवाकरोत् ॥ ४९ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे निर्वा० उत्त० चतुर्दशोत्तरद्विशो ॥ २१४ ॥

रामादिवत्प्रबुद्धस्त्वं जीवन्मुक्तः सुखी भवेः ॥ इति वाल्मीकिना शिष्यो भरद्वाजोऽत्र शिष्यते ॥१॥ इति अन्यथा वर्णितं यथा रामादयः नि-
श्लोकतां प्राप्ताः ॥१॥ त्वमपि एतामेव पूर्णां ब्रह्मोदरां अवष्टभ्य दृष्टिं आश्रित्य तिष्ठ ॥२॥ इदं स्तत्त्वमुपदिष्टं ज्ञानं दुःसंगेन भोगाभ्यासेन च यथा नन-
श्यति तथा रक्षेत्याशयेनाह । धीरेति ॥३॥ दशरथादयो राजानः सुप्रास्त्वं सुसि मे जनकः छांदसोऽदादेशः ॥४॥ स्वयं स्वविचारेणैव रामवत्पूर्वं मुक्ते-
धीरसि अद्य तु इमां मोक्षसंहितां श्रुत्वा मुक्तोऽनरोऽसि । संभावित सर्वशोकापकर्षणात् अनादिति भावः ॥५॥ दृष्टपरमपुरुषार्थफलत्वादस्य शास्त्र-
स्य सर्वशास्त्रेभ्योऽस्य दिं ततमत्वं मंदाधिकारिष्वपि अभ्यासफलोपधानसमर्थत्वं च दर्शयति । मोक्षोपायानिति ॥ बाह रामुख्याधिका-
रिणि फलोपधाने का कथा ॥६॥ हे साधो वसिष्ठवाक्यानां द्विप्रसरेण सर्वसंशयसहिताज्ञाननाशात् महानुभावाः रघवो रामाद-
पुण्यं जीवन्मुक्तपदं अनुप्रयाताः संतो विशोकाः संपन्नाः एवमेव त्वयापि अपद्यमित्यम् सिद्धं ब्रह्मभावलक्षणं जीवन्मुक्तपदं गंतव्यं विशोकेन
च भाव्यमित्यर्थः ॥७॥ तस्माव न्येषामपि सत्संगसेवाप्रश्नादिरेवोपायइत्याह ॥ सतामिति ॥ नयेन शिक्षणेन उत्तमया लोभालस्यनिद्रादित्यागसहितया

६१७

श्रीवाल्मीकिरुवाच ॥ भरद्वाज महाबुद्धे मम शिष्याधिनायक ॥ इति रामादयो ज्ञानश्रिया निःशोकतां गताः ॥१॥ एतामेव दृ-
ष्टिमालम्ब्य यथासुखं । नीरागास्तिष्ठ निःशंको जीवन्मुक्तः प्रशान्तधीः ॥२॥ धीर नभ्यस्तसंसारादि रामादीनामिवान-
घ ॥ घनमोहनिमग्नोऽपि विमूढोऽपि न मुह्यसि ॥३॥ एवमेते महात्मानः जीवन्मुक्तपदं गताः ॥ राजपुत्रा राघवाद्या राजा द-
शरथादयः ॥४॥ त्वं च पुत्र भरद्वाज स्वयमेवासि मुक्तधीः ॥ सत्यं मुक्तनरोऽस्यद्य श्रुत्वेमां मोक्षसंहिताम् ॥५॥ मोक्षोपायानिमा-
न्पुण्यान्प्रत्यक्षानुभवार्थदान् ॥ बालोऽप्याकर्ण्य तत्त्वज्ञो नितरां वाहरे कथा ॥६॥ यथा पदं पुण्यमनुप्रयाता महानुभावा
रघवो विशोकाः ॥ वसिष्ठवाक्यप्रसरेण साधो गंतव्यमाद्यं पदमेवमेव ॥७॥ सतां नयेनोत्तमसेवया च प्रश्नेन चोदारकथानुगा-
तेन ॥ विंदंति वेद्यं सुधियोऽप्रमत्ता वसिष्ठसंगादिव राघवाद्याः ॥८॥ स्वच्छावरत्वादहत्वं बंधबद्धार्थं तथयोज्ञस्य हृदि प्ररूढाः
॥ सर्वे हि ते मोक्षकथाविचाराबालस्य बालाइव यांत्यभेदं ॥९॥ मोक्षाभ्युपायाननुमहानुभावान्नाश्यतियेन स विदां वरिष्ठः ॥
पुनः समेष्यंति न संसृतिं ते कोऽर्थः सुतान्येन बहूदितेन ॥१०॥

सप्रेमनिरंतरसेवया उदाराभिर्बोधोपायभूताभिः कथाभिराख्यायिकाभिः संगतेन तदुपदेशेन सुधियोऽधिकारिणः वेद्यमात्मतत्त्वं विंदंति लभं-
ते । अप्रमत्ता स्तदेकासक्ताः श्रेयः यथा वसिष्ठसंगाद्राघवाद्या अविंदन् तद्वदित्यर्थः ॥८॥ तच्छाल्लक्षणाया वरत्वायाभ्यर्भरज्वाः इदं बंधैर्बद्ध
अस्य हृदिप्ररूढाः येदेहेंद्रियादिना दात्म्यसंसर्गाध्यासरूपाः ग्रंथयः येच गृहपुत्रदारादिषु ममताभिर्लक्षणाः सर्वे भूतेषु तस्यानुभवैकरसस्यभेदाद्ग्र- निवेश
गादेवादिदेहतवो ग्रंथयस्तेसर्वे हि अस्मान्मोक्षशास्त्रविचारात् यथाबालाः स्त्रियः पूर्वबाल्यात्क्रीडाद्यभिनिवेशाद् स्तान निर्ज्ञातावचभर्तृ पुत्रैरस्ययु-
कैर्थ्यां
पुक्तो अपि कालेन जबालाः प्रौढाः सत्य भर्तृभिरभेदं ऐकरस्यं यांति सर्वः ॥९॥ द्वयुतपुत्रवदनुकंप्यामरद्वाजमं दाधिकारिणामपिश्रवणाभ्या-
सअज्ञाननिबर्हणसमर्थत्वास्तु महानुभावानिमान्मोक्षाभ्युपायान्गुरुर्पूर्वेश्रवणेन येन्ताश्यतिमेततत्त्वविदां वरिष्ठाः संतः पुनः संसृतिं न
समेष्यंति इयं मम संहितपरमरहस्योक्तिः ॥ अन्येन च कुनाउदितेन उक्तेन कोऽर्थः किं प्रयोजनमित्यर्थः ॥१०॥

४०

इदानीं वक्तृणामपि गुरुमुखाद्विचार्यैव संप्रदायतोऽर्थं सम्यग्ज्ञात्वा अन्येभ्यः श्रावयतामेव वक्तॄणां फलं वाच्छितानां येषामिति नियमं सूचयन्नाह । बकुश्रुता ये
इति । अमुं ग्रंथं ये संतः बहुश्रुतानां गुरूणां मते स्वयं सम्यक् प्रविचार्य तत्संवादकथया तेषु सम्यक् प्रबोधितार्थं सति पुनः पश्चात् स्वयमपि तेभ्यो
यः संप्रदायतो वदिष्यंति ते शिष्यं श्रुतं मोक्षं पुनर्जन्म वा प्राप्स्यति । अवश्यं ते तत्वज्ञानफलं प्राप्स्यतीत्यर्थः ॥ अन्यैः संप्रदायतोऽनधिगतैर्वक्तृभिः श्रोतृभिः
श्रावितैर्वा किं प्रयोजनमित्यर्थः ॥११॥ इदानीमर्थावगमं विनापि ग्रंथपारायणस्य पुस्तकलेखनस्य वाचक [illegible] नेन व्याख्यापनस्य च फलमाह । ये वाच
यिष्यंतीति द्वाभ्यां अनपेक्षितार्थः सत्यभावादर्थापेक्षारहिता अपि पारायणदक्षिणाद्यानपेक्षा निर्लोभाः श्रेयः पुस्तके लेखयिष्यंति । ये
इति रूपेणैव व्याख्यास्यंति ते पुरुषपुंगवाः बहुवत्सरं राज्यं [illegible] निते सकामा अश्वमेधराजसूयस्य यज्ञस्य फलेन युक्ताः सतः पुनः पुनः स्वर्गं प्रयास्यंति ।
उदारसत्वा निष्कामास्तु जन्मजन्मसु सद्गुरु सदुपास्त्रश्रवणादि प्राप्य तृतीये जन्मनि लाभेन मोक्षं प्रयास्यंति । तेऽस्मा मिव त्वभयत्र
ष्टांतः ॥१२॥१३॥ इदं श्रीमहाफलं तस्य ग्रंथस्य कुतस्त्वाह । इमां मितीं मयाहृतामिमां मोक्षमयीं सुसंहितां पुरा पूर्वकाले अचिंत्यरूपो विरिंच्यः सतां पुनी

बहुश्रुतानप्रविचार्य सम्यक् प्रबोधितार्थं कथया जनाय । संतो वदिष्यंति पुनः शिशुत्वं न ते प्रयास्यंति विमुक्तवाक्याः ॥११॥ ये वाचयिष्यंत्यनपेक्षितार्थाः
ये लेखयिष्यंति च पुस्तके वा । ये कारयिष्यंत्यपि वाचकं वा व्याख्यानतः पुंगव भूमभार्यः ॥१२॥ ते राजसूयस्य फलेन युक्ताः मुहुर्दिवं स्वर्गमुदारसत्वाः ॥ मोक्षं
प्रयास्यंति तृतीयजन्मलाभेन लक्ष्मीमिव पुण्यवंतः ॥१३॥ इमां पुरा मोक्षमयीं विचार्य सुसंहितां स्वहृच्चनाद्विरिंचः ॥ प्रयुक्तवानेन दचिंत्यरूपो भवं
त्यसत्याश्रुनतस्य वाचः ॥१४॥ मोक्षाभ्युपायाख्यकथा प्रबंधे यानेस्म मादिं सुधिया प्रयत्नात् ॥ सुवेशमद्वा मिमतीं प्रपातुं दानेन विप्राः परिपूजनी
याः ॥१५॥ देयं च तेभ्यः खलु दक्षिणादि चित्तेप्सितं स्वस्य धनस्य राशः ॥ न चानुरूपं सततं च संग पुण्यं यथा शास्त्र मुपैति सोन्ततः ॥१६॥ एतत्रैव
६२ क्षितं कथाक्रमशो नवबोधाय बुद्धिमान् । न्यासो द्वितीय हतत्रलसमलं दृष्टं नमुत्स्य चिंतां ॥ अश्येन स्थिरतिष्ठिति भजन्मत्रो जीवद्विमुक्तो राघो लक्ष्मीता
नतपः क्रियाक्रमयुतां भुक्तोश्याम क्षयः ॥१७॥ ॥ इत्यार्षे श्रीमहारामायणे वाल्मीकीये वासिष्ठे पंचदशोत्तरद्विशततमः सर्गः ॥२१५॥ श्रीवाल्मीकिरुवाच ॥ एतल्लोक हितं राम [illegible] भवबंधे ॥२॥
वासिष्ठ [illegible] पंचदशोत्तरद्विशततमः सर्गः ॥२१५॥ श्रीवाल्मीकिरुवाच ॥ एतत्लोके [illegible] तं राम [illegible] भवांबुधेः ॥२॥

नो समाजे आमूलाग्रं स्वयं विचार्य एतद्वाक्यं सर्वाभ्युत्सुकवान् । किमेते न । तस्य वाचो वाल्मीकेर्वसिष्ठस्य स्वस्य मितः असत्याः न भवंतीति तथा
चरुवं समाप्य एते मत्यं स्वस्य वरदानं न ते वागन्न ताः कार्याः काचिदत्र भविष्यतीति सूचनार्थं भवक्रः ॥१४॥ एतच्छास्त्र समाप्तौ महान्धनादि दानेन विप्रा
दं ... वश्य केर्ज यानित्यादि ॥ मोक्षेति । विप्राः वाचकाद्याः उपलक्षणमेतत् । मित्रभृत्यदीनांधकृपणानामपि ॥१५॥ स्वधनस्य मध्ये तेषां चित्त
पूजितादक्षिणा यथा त्यादेया । असौ कृतात्स्वरूप मेव अवश्यं स्वजतइति संगेपुण्यं फलमनाय यथा शास्त्रमुपैत्येवेति मत्वा विचिंत्येत्य
र्थः ॥१६॥ हे राम भरद्वाजेतत् बुद्धबोधाय कथाक्रमशातेषु हितत्र हात तत्संदृष्टांत युक्त्या अचितं एतच्छास्त्रं मया कथितं ॥ एतच्छ्रुत्वा
जीवन्नेव विमुक्तो राघवः सन् लोकानुग्रहाय ज्ञानतपः क्रियाफलयुतां प्रारब्धभोगासक्तकर्मफलभूतां योगज्ञानसिद्ध्यैश्वर्ये लक्ष्मीम
श्रयां चिरस्थायिनीं भुक्त्वा संदेहाविदेहश्च चिरं निष्टितं निरतिशयं रूपां मुक्तिं भजेत्याशीरंते मंगलार्थः ॥१७॥ ॥ इति नंद
श्रीवासिष्ठतात्पर्यप्रकाशे निर्वाणप्रकरणे उत्तरार्द्धे पंचदशोत्तरद्विशततमः सर्गः ॥२१५॥ ॥ अरिष्टनेमिस्तु रुचिका
कारुण्यादि ... तार्थता ॥ वर्ण्यते त्र गुरुभ्यश्च शिष्येरा समनिवेदनं ॥ कुंभयोनेर्वसिष्ठस्यागस्त्यस्य च रामादीनां स्तुति
मुं प्रतिचसुभाषितं । अमुना एतद्ग्रंथरूपेण ॥१॥ राजा अरिष्टनेमिः वाल्मीकिं प्रति दृष्टिः कृपा कटाक्षः ॥२॥
॥२॥ मैं मूलं जन्कुंभयोनेः सुभाषितं ॥ अमुना तव मार्गेण तत्पदं प्राप्स्यसि ध्रुवं ॥१॥ राजोवाच ॥ भगवन्भवतो ह
१॥ ष्टि भवबंधविनाशिनी ॥ आलोकिता यया चाद मुनीनां सिम ... रोधः मूलस्य ११०

॥३॥ मैत्रं मित्रभावः समतिः पदेषु गतैर्लभ्यत इति साप्तपदं रे विक्रोण इति य सद्भिर कृतं स्वयासर्वं कृतमित्यर्थः ॥४॥ सर्वतो
पोपरामेण निर्वृतः ॥ निरतिशयानंदरूपो मुदितः ॥५॥ इति राज्ञा अहमुक्तः सन् तद्धि नयादिगुणगणसंपदापरं विस्म
यमागतः ॥६॥ स्वस्यापि सत्संगवत्नो नश्रवणलाभात्कृतार्थता जातेत्याह । श्रुत्वेमानिति ॥ पूर्वं कदापि न श्रुतमपूर्वमेवेतत् ज्ञा
नसारं सत्संगान्मया श्रुतं ॥७॥ वदंतिके तामुपदेष्टुमित्यर्थः ॥ अनघेदृति संबोधनेन निष्पापत्वादधिकारसंपत्तिं सूचयति ॥ दृष्टं
एतत्सर्वं ते तुभ्यं आख्यातमिति सूचितं ॥८॥ परां निर्वृतिं सुखविश्रांतिमागतोहमित्यन्वेषः ॥९॥१०॥ तदुपदिष्टं स्व्याख्यैक्य

॥ श्रीदेवदूत उवाच ॥ इत्युक्त्वा स ततो राजा विस्मयोत्फुल्ललोचनः ॥ उवाच वचनं मां तु श्लक्ष्णं मधुरया गिरा ॥३॥
राजोवाच ॥ देवदूत नमस्तुभ्यं कुशलं चास्तु ते विभो ॥ सतां साप्तपदं मैत्रमित्युक्तं [illegible] ॥४॥ इदानीं गच्छ भद्रं ते देवराजनिवेशनं ॥
अनेन श्रवणेनाहं निर्वृतो मुदितोपि च ॥५॥ कृतार्थश्चिंतयन्नत्र स्थास्यामि विगतज्वरः ॥ इत्युक्तोहं ततो भद्रे परं विस्मयमाग
तः ॥६॥ न श्रुतं पूर्वमेवैतत् ज्ञानसारं श्रुतं मया ॥ तेनैव मुदितश्चांतः पीतामृत इवांबुना ॥ ततो वाल्मीकिमाप्य आगतोस्मि तदंतिके ॥
एतत्ते सर्वमाख्यातं त्वया पृष्टं महामने ॥८॥ इतः परं गमिष्यामि [illegible] स्वसदनं प्रति ॥ अरिष्टनेमिरुवाच ॥ नमोस्तु ते महाभाग देवदूत तव
या मम ॥ आश्रिता दर्थ [illegible] इति मागतान ॥९॥ कृतार्थो वीतशोकोस्मि स्थास्यामि विगतज्वरः ॥ इदानीं गच्छ भद्रं ते यथे
च्छं नाकसंनिधौ ॥१०॥ अग्निवेश्य उवाच ॥ ततः सा सुरुचिः श्रेष्ठा तमेवार्थमचिंतयत् ॥ स्थिता सा हिमवत्पृष्ठे समीपे गंधमादने ॥११॥
॥ कश्चिदेतच्छ्रुतं पुत्र वसिष्ठस्योपदेशनं ॥ तत्सर्वमवधार्याथ यथेच्छसि तथा कुरु ॥१२॥ कारुण्य उवाच ॥ स्मृतिर्वा [illegible] सत्ता च
स्वप्ने वंध्यासुते जले ॥ मरीचिका यथा तद्वत् ज्ञाना संसारिकी स्थितिः ॥१३॥ मम नास्ति कृतेनार्थो नाकृतेनेह कश्चन ॥ य
था प्राप्तानुतिष्ठामि त्यक्रमीणि कुत आग्रहः ॥१४॥

तृक्षणमेवार्थं ॥११॥ तत्सर्वमिति मोक्षस्य कारणं कर्म ज्ञानं वा मोक्षसाधनं न मित्तिवदीयसंदेहस्य तदवधारणे [illegible] मा देवो छेदसि
द्धिरिति भावः ॥१२॥ अतएव स्वस्य सम्यक् सर्वसंत्या विषयबाधादूषिताश्निमाश्रेणाथ प्राप्तानुवर्तनमेव जीवन्मुक्तस्य परिशि
ष्यत इति कारुण्य उवाच स्मृतिरित्यादिना ॥ अतीतानागते स्वसन्निदृष्टे च विषये स्मृतिः परोक्षधीर्वा व्यवहारे वा अवर्तमानविषये दृ
ष्टिसत्ता प्रत्यक्षं मम सांप्रतं तत्वज्ञानान्न स्वप्ने प्रतीते वंध्यासुतविषये यथा निर्विषयास्तथा निर्विषयाः संपन्नाः सर्वापि च सं
सारिकी स्थितिः अजले मरुदेशे मरीचिकाम् मरीचिका यथा तद्वत् संपन्नेति कापि विषयेन कश्चिदपि संदेहः परित्याज्य इत्यर्थः ॥
तमादिवेद यथाप्राप्तेन वर्णाश्रमोचितव्यवहारेण तिष्ठामि स्थास्यामि अकर्मणि वा अकर्मत्यागे ॥१४॥ ॥ ॥

प्राप्तकर्मविनाहं न प्राप्तकर्माधिकारः सन् काले यथोचितकालस्नानदानाग्निहोत्रातिथिसपर्यादि कर्म उपाहरत अनुष्ठितवानित्यर्थः। नामेति किलार्थे ॥१५॥ हे सुतीक्ष्ण ज्ञानकर्मणि ज्ञाने तेरं कर्मानुष्ठानविषये कर्मबंधो यन्नविघ्नतीति संदेहो न कर्तव्यः ॥१६॥ अनेकेषां संदेहविषयाविरूढानेकार्थात्मका नासा सारिकार्थी नापार मार्थिकमुक्ततत्ता निनासर्वविरोधत्यागेन बोधनं मुनेरागस्त्यस्येतद्वाक्यं श्रुत्वा अतिकूसमीपे ॥१७॥

अगस्तिरुवाच॥ इत्युक्तो नाम कारुण्य अग्निवेश्यसुतः सती॥ प्राप्तकर्म यथान्यायं काले काले समुपाहरत्॥१५॥ संदेहोऽत्र न कर्तव्यः सुतीक्ष्ण ज्ञानकर्मणि॥ संशयाद्वर्धयते स्वार्थात्संशयात्मा विनश्यति॥१६॥ एतच्छ्रुत्वा मुनेर्वाक्यमनेकार्थैकबोधनं॥ नमस्कृत्य गुरुं प्राह अतिकेविनयान्वितः॥१७॥ सुतीक्ष्ण उवाच॥ नष्टमज्ञानतः कार्यं प्राप्तं ज्ञानमनुत्तमं॥ साक्षिणि स्फुरिताभासे ध्रुवे ध्रुवेदीपवत्क्रियाः॥१८॥ सतियस्मिन्प्रवर्तन्ते चित्ते स्पंदपूर्विकाः॥ कटकांगदकेयूरनूपुरैरिव कांचनं॥१९॥ पयसीव तरंगाली यस्मात्स्फुरति दृश्यभूः॥ तदेवेदं जगत्सर्वं पूर्णं पूर्णे व्यवस्थितं॥२०॥ यथा प्राप्तोनुवर्तामि कालं धयति सद्वचः॥ भवंस्त्वत्प्रसादेन ज्ञातज्ञेयोस्मि संस्थितः॥२१॥ कृतार्थोहं नमस्तेस्तु दंडवत्पतितोस्मि॥ गुरोरुत्तीर्णता केन शिष्याणामस्ति कर्मणा॥२२॥ कायवाङ्मनसा तस्माच्छिष्येण तन्निवेदनं॥ गुरोरुत्तीर्णता सैव नान्या केनापि कर्मणा॥२३॥ स्वामिंस्त्वत्प्रसादेन उत्तीर्णोहं भवार्णवात्॥ आपूरितजगज्जालं स्थितोस्मि गतसंशयः॥२४॥ यत्सर्वं खल्विदं ब्रह्म तज्जलानिति च स्फुटं॥ श्रुत्यास्तु दीर्घते सामित संस्थितं ब्रह्म तस्मै नमः॥२५॥ इति श्रीमहारामायणे निर्वाणप्रकरणे उत्तरार्धे बालकांडे मोक्षोपाये देवदूतोक्ते शतसा० वासिष्ठब्रह्मदर्शने षोडशोत्तरद्विशततमः सर्गः॥२१६॥ संपूर्णो ग्रंथः २३०००

यस्मिन्सर्वसाक्षिणि परमेश्वरे निरस्तपर्यायेऽष्टादेवजिस्य स्फुरिताव भासे ध्रुवे निष्क्रिय स्थिते सति नाट्यशालायां दीपे स्थिते सति तत्रस्थाः शाम्नुपजीव्यनटनर्तकादीनां क्रिया इव सर्वाः स्पंदपूर्वपश्चिमेहाः लौकिकवैदिकक्रियाः प्रवर्तंते यस्मात् कटकांगदकेयूरनूपुरैः कांचनमिव पयसि तरंगालीव इदं दृश्यभूः स्फुरति इदं जगत्सर्वं न देवं ना गुमात्रमपि तदन्यत् क्रियाकाररूपकालादिदृश्यं तद्ब्रह्मरूपं पितृश्रुतावप्युक्तं इति निश्चित्य यथायस्मिन्नाश्रमे प्राप्तं तत्तदुपहारमनुवर्तामि अनुवर्त्ते छांदसः पदव्यत्ययः॥१८॥१९॥२०॥२१॥ इदानीं श्रीगुरूक्तस्य परमपुरुषार्थप्रापकज्ञानदानोपकारस्य जगति प्रत्युपकारोपपत्तिर्नास्तीत्यर्थः॥२२॥ हे स्वामिन् अहं तव प्रसादेन भवांबुधेरुत्तीर्णः सन्पूर्णानंदभावेनापूरितजगज्जालं यथास्यात्तथा स्थितोस्मि नात्र संशयः॥२४॥ मम हृदयंगतमसज्ञेनघरणं समस्तगुणसदनं॥ सच्चित्सुखसारघनं सदैव हृदये सदा वंदे॥ अस्यग्रंथस्य सर्वोपनिषत्सारार्थोपहितानविगत सच्चिदानंदाद्वयब्रह्मतत्वमनुसंदीयाते मगाधार्थं नमस्यति यत्सर्वमिति॥ यद्ब्रह्म साक्षि सामवेदे सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति छांदोग्योपनिषत्प्रदर्शितं स्फुटं नरोपायसंज्ञोज्ञानिति श्रुत्यास्फुरं अधिकारिणां करतलामलकवदपरोक्षं यथा भवति तथा परमतात्पर्येण दीर्घते। तस्मै तज्ज्ञावेनपरिशिष्टापासनेप्रत्यक्षानंदघनाय नमइत्यर्थः॥२५॥ ॥निमज्जंतं भयार्णवे स्वसंविद्विद्याक्रिजलधौ सदर्थांशुनीतं हृदि गुरुकटाक्षालेवितपदं॥ विचिन्वानोनाद्यं तर्जितधिजठरं को नु कलयेदियमोरणानां प्रभुरनरूपलेरपि सती॥२॥ निरूपमनिजविस्तारं नि:शेषसंसारविनाशतनगंभीरं॥ नित्यसुखात्मतपरं काशितपादं त्राप्यश्रीरामचंद्रसरस्वतीपूज्यपादशिष्य श्रीगंगाधरेंद्रसरस्वत्याख्यभिक्षोः शिष्येणानंदबोधेंद्रभिक्षुणा विरचितश्चैत्रिष्ठता सर्वप्रकाशः संपूर्णः॥७॥